योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०६५

पञ्चषष्टितमः सर्गः ६५

श्रीवसिष्ठ उवाच ।

परस्मात्कारणादेव मनः प्रथममुत्थितम् ।

मननात्मकमाभोगि तत्स्थमेव स्थितिं गतम् ।। १

भावाभावलसद्दोलं तेनायमवलोक्यते ।

सर्गः सदसदाभासः पूर्वगन्ध इवेच्छया ।। २

न कश्चिद्विद्यते भेदो द्वैतैक्यकलनात्मकः ।

ब्रह्मजीवमनोमायाकर्तृकर्मजगद्दृशाम् ।। ३

अपारावारविस्तारसंवित्सलिलवल्गनैः ।

चिदेकार्णव एवायं स्वयमात्मा विजृम्भते ।। ४

असत्यमस्थैर्यवशात्सत्यं संप्रतिभासतः ।

यथा स्वप्नस्तथा चित्तं जगत्सदसदात्मकम् ।। ५

न सन्नासन्न संजातश्चेतसो जगतो भ्रमः ।

अथ धीसमवायानामिन्द्रजालमिवोत्थितः ।। ६

दीर्घः स्वप्नः स्थितिं यातः संसाराख्यो मनोबलात् ।

असम्यग्दर्शनात्स्थाणाविव पुंस्प्रत्ययो मुधा ।। ७

अनात्मालोकनाच्चित्तं चित्तत्वं नानुशोचति ।

वेतालकल्पनाद्बाल इव संकल्पिते भये ।। ८

अनाख्यस्य स्वरूपस्य सर्वाशातिगतात्मनः .।

चेत्योन्मुखतया चित्तं चित्ताज्जीवत्वकल्पनम् ।। ९

जीवत्वादप्यहंभावस्त्वहंभावाच्च चित्तता ।

चित्तत्वादिन्द्रियादित्वं ततो देहादिविभ्रमाः ।। १०

देहादिमोहतः स्वर्गनरकौ मोक्षबन्धने ।

बीजाङ्कुरवदारम्भसंरूढे देहकर्मणोः ।। ११

द्वैतं यथा नास्ति चिदात्मजीवयो-

स्तथैव भेदोऽस्ति न जीवचित्तयोः ।

यथैव भेदोऽस्ति न जीवचित्तयो-

स्तथैव भेदोऽस्ति न देहकर्मणोः ।। १२

कर्मैव देहो ननु देह एव

चित्तं तदेवाहमितीह जीवः ।

स जीव एवेश्वरचित्स आत्मा

सर्वः शिवस्त्वेकपदोक्तमेतत् ।। १३

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये उत्पत्तिप्रकरणे लीलोपाख्याने जीवविचारो नाम पञ्चषष्टितमः सर्गः ।। ६५ ।।